# रुद्र यज्ञ

भूः स्वाहा अग्नये इदं न मम
भुवः स्वाहा वायवे इदं न मम
स्वः स्वाहा सूर्याय इदं न मम
भूर्भुवः स्वः स्वाहा प्रजापतये इदं न मम

गु॑रु॑र्ब्र॑ह्मा॑ गु॑रु॑र्वि॑ष्णुः गु॒रुर्दे॒वो म॑हेश्व॒र॒ः
गु॑रु॒सा॑क्षा॑त् प॑र॑ब्र॑ह्म त॒स्मै श्री गु॑र॑वे न॒म॒ः

ब्र॒ह्मान॑न्दं प॒र॒म॒ सु॑ख॑दं के॑व॑ल॒ं ज्ञान॑ं मू॒र्तिम्
द्वं॒द्वाती॑तं ग॒ग॒न॒ सदृ॑शं तत्त्व॑म॒स्यादि॑ ल॒क्ष्यम्
ए॒कं नि॑त्यं वि॒म॒ल॒मच॑लं सर्व॑धी॒ साक्षी॑ भू॒तम्
भा॒वाती॑तं त्रि॒गु॒ण॒ रहि॑तं सद्गु॑रु॒ं तं नमा॑मि

ॐ च॑त्वा॑रि शृ॒ङ्गा त्रयो॒॑ऽस्य पा॒दा द्वे॒ शी॒र्षे स॒प्त॒ ह॒स्ता॑सो॑ ऽस्य
त्रि॒धा॒ ब॒द्धो वृ॒षभो॑ रो॑र॑वीति म॒हो॒ दे॒वो मा॒र्त्यां॑मा॑वि॑वे॑श

इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शँ्सिषद्विश्वेदेवाः
सूक्त वाचः पृथिवि मातर्मामा हिँ्सीर्मधुमनिष्ये मधुजनिष्ये
मधुवक्ष्यामि मधुवदिष्यामि मधु मतीं देवेभ्यो वाचमुद्यासँ्
शुश्रूषेण्यां मनुष्येभ्यस तं मा देवा अवन्तुशोभायै पितरोऽनु मदन्तु
ॐ शांतिः शांतिः शांतिः

ॐ नमो भगवते रुद्राय

# नमकम्

ॐ नम॑स्ते रुद्र म॒न्यव॑वौ॒तो तैष॒वे नम॑ः
नम॑स्तॆ ऽस्तु धन्व॑ने बा॒हुभ्या॑मु॒त ते नम॑ः स्वा॒हा

या तै॒षु॑ः शि॒वत॑मा शि॒वं ब॒भूव ते धनु॑ः
शि॒वा श॒र॒व्या या त॒व त॒या नो॑ रु॒द्र मृड॑य स्वा॒हा

या॒ ते रु॑द्र शि॒वा त॑नू॒र॒घोरा॑ ऽपाप॒काशि॑नी॒
त॒या॒ नस्त॒नुवा शं॑न्त॑म॒या गिरि॑श॒न्ताभि॒ चाक॑शीः स्वा॒हा

या॒मि॒षुं गि॒रि॒श॒न्तं ह॒स्ते बि॒भर्ष्य॑स्तवे
शि॒वां गि॒रि॒त्र तां कु॑रु मा॒ हि॒ँ॒सीः पु॒रु॒षं जग॑त स्वा॒हा

शि॒वेन॑ व॒च॒सा त्वा॑ गि॒रि॒शाच्छा॑ व॒दाम॑सि
य॒था॒ नः स॒र्व॒मिज्ज॒ग॒द॒य॒क्ष्मं॑ँ सु॒म॒ना ऽसंत स्वा॒हा

अ॒ध्य॒वो॒च॑द॒धि॒व॒क्ता प्र॒थ॒मो दै॑व्यो भिषक
अ॒हीँ॒श्च स॒र्वाञ्जम्भ॒यन्त स॒र्वाश्च॑ या॒तु॒ धान्य॑ः स्वा॒हा

अ॒सौ यस्ता॒म्रो ऽरु॒णौत ब॑भ्रुः सु॒मङ्ग॒लः
ये॒ चे॒मा॑ँ॒ रु॒द्रा ऽभि॒तो दि॑क्षु श्रि॒ताः स॒ह॑स्र॒शो ऽवै॒षा॑ँ॒ हे॑ड॒ ईम॑हे स्वा॒हा

अ॒सौ यो॑ ऽव॒सर्व॒प॒ति नी॒लग्री॑वो वि॒लो॒हित॑ः उ॒तै॒नं गो॒पा ऽदृ॒शन्न॑दृ॒शन्नु॒द॒हार्य॑ः
उतै॒नं॑ वि॒श्वा भू॑तानि॒ स॒ दृष्टो मृ॒ड॒याति॑ नः स्वा॒हा

न॒मो ऽस्तु नी॒लग्री॑वाय स॒ह॒स्रा॒क्षाय॑ मी॒ढुषे॑
अ॒थो ये ऽस्य॑ स॒त्वानो॑ ऽहं ते॒भ्यो ऽक॒रं नम॑ः स्वा॒हा

प्रमु॑ञ्च॒ ध॒न्व॒नस्त्वमु॒भ॒यो॒रा॒र्त्नि॒योर्ज्या॑म्
याश्च॑ ते ह॒स्तै॒षव॑ः प॒रा ता॑ भ॒ग॒वो व॑प स्वा॒हा

अवत॑त्य॒ ध॒नुस्त्वं॑ँ स॒ह॒स्रा॒क्ष श॒तेषु॑धे
नि॒शीर्य॑ श॒ल्याना॑ं मु॒खा शि॒वो न॑ः सु॒म॒ना भ॑व स्वा॒हा

वि॒ज्यं धनु॑ः क॒प॒र्दिनो वि॒श॒ल्यो॑ बा॒न॒वा॑ँ॒ उ॒त
अ॒ने॒शन्न॒स्येष॑वा॒भु॒रस्य॒नि॒ष॒ङ्ग॑थिः स्वा॒हा

या॒ ते हे॑ति॒र्मी॒ढुष्ट॑म ह॒स्ते ब॒भूव॒ ते धनु॑ः
त॒या॒ ऽस्मान्वि॒श्वत॒स्त्व॒मय॒क्ष्म॒या प॒रि॒भुज स्वा॒हा

न॒म॒स्ते ऽस्त्वायु॑धा॒या॒ना॒त॒ता॑य धृ॒ष्णवे॑
उ॒भाभ्या॑मु॒त ते न॑मो बा॒हुभ्या॑ं त॒व॒ धन्व॑ने स्वा॒हा

प॒रि॒ ते धन्व॑नो॒ हे॑ति॒र॒स्मान्वृ॑णक्तु॒ वि॒श्वत॑ः
अ॒थो यै॑षु॒धिस्त॑वा॒रे ऽस्मन्नि॑ धेहि तम् स्वा॒हा ॥१ ॥

नमो हि॒रण्य॑ बाहवे सेना᳚न्ये दि॒शांच प॒तये न॑मो स्वा॒हा
नमो वृ॒क्षे᳚भ्यो हरिके᳚शेभ्यः प॒शूनाँ᳚ प॒तये न॑मो स्वा॒हा
नमः स॒स्पिञ्ज॑राय त्वि॒षीम॑ते प॒थीनां॑ प॒तये न॑मो स्वा॒हा
नमो बभ्लु॒शाय॑ विव्या॒धिने᳚ ऽन्ना॒नां प॒तये न॑मो स्वा॒हा
नमो ह॒रिके᳚शायोप॒वीति॑ने पु॒ष्टा᳚नां प॒तये न॑मो स्वा॒हा
नमो भ॒वस्य हे॒त्यै ज॒ग॒तां प॒तये न॑मो स्वा॒हा
नमो रु॒द्राया ऽत॒तावि॑ने क्षे॒त्रा᳚णां प॒तये न॑मो स्वा॒हा
नमः सू॒ताया॑हन्त्याय॒ व॒नानां प॒तये न॑मो स्वा॒हा
नमो रोहि॑ताय स्थ॒ पतये वृ॒क्षाणां॑ प॒तये न॑मो स्वा॒हा
नमो म॑न्त्रि॒णे वाणिजा॑य क॒क्षाणां प॒तये न॑मो स्वा॒हा
नमो भु॒वन्त॒ये वा॑रि॒वस्कृ॒तायौष॒धीनां प॒तये न॑मो स्वा॒हा
नमो॒ च्चैर्घो᳚षाया॒ ऽक्रन्दय॑ते प॒त्तीनां प॒तये न॑मो स्वा॒हा
नमः कृ॒त्स्नवीताय धाव॑ते स॒त्वनां प॒तये नम॑ः स्वा॒हा ॥२॥

नमः स॒ह॒माना॑य नि॒व्याधि॑नाव्या॑धि॒नीनां प॒तये न॑मो स्वा॒हा
नमः क॒कुभा॑य नि॒षङ्गि॑णे स्ते॒नानां प॒तये न॑मो स्वा॒हा
नमो निष॑ङ्गिणै॒षुधिम॒ते त॑स्करा॒णां प॒तये न॑मो स्वा॒हा
नमो व॑ञ्च॒ते परि॑वञ्च॒ते स्तायू॑नां प॒तये न॑मो स्वा॒हा
नमो नि॒चेर॑वे प॒रिच॒रायार॑ण्या॒नां प॒तये न॑मो स्वा॒हा
नमः सृ॒कावि॑भ्यो जिघाँ॑सद्भ्यो॒ मुष्ण॒तां प॒तये न॑मो स्वा॒हा
नमो ऽसिम॑द्भ्यो न॒क्तं च॑रद्भ्यः प्र॒कृन्ता॑नां प॒तये न॑मो स्वा॒हा
नमौ ष्णीषि॑णे गिरि॒चराय॑ कु॒लुञ्चा॑नां प॒तये न॑मो स्वा॒हा
नमै षु॒मद्भ्यो ध॒न्वावि॑ भ्यश्च॒वो न॑मो स्वा॒हा
नमा॒ तन्वा॑नेभ्य॒ः प्र॒ति॒द॒धाने॑ भ्यश्च॒वो न॑मो स्वा॒हा
नमा॒ यच्छ॑द्भ्यो॒ विसृ॒जद् भ्य॑श्च॒वो न॑मो स्वा॒हा
नमो ऽस्य॑द्भ्यो वि॒ध्यद् भ्य॑श्च॒वो न॑मो स्वा॒हा
नमा॒ सीने॑भ्य॒ः श॒याने भ्य॑श्च॒वो न॑मो स्वा॒हा
नमः स्व॒पद्भ्यो॑ जा॒ग्रद् भ्य॑श्च॒वो न॑मो स्वा॒हा
नमस् ति॒ष्ठद्भ्यो॑ धा॒वद् भ्य॑श्च॒वो न॑मो स्वा॒हा
नमः स॒भाभ्य॑ः स॒भापति॑ भ्यश्च॒वो न॑मो स्वा॒हा
नमो ऽश्वे᳚भ्यो ऽश्व॒पति॑ भ्यश्च॒वो नम॑ः स्वा॒हा ॥३॥

नमो॒ व्याधिनी॑भ्यो॒ वि॒विध्य॑न्ती भ्य॑श्च॒वो न॑मो स्वा॒हा
नमो॒ ग॒णाभ्य॑स्तृ॒ँ॒हती भ्य॑श्च॒वो न॑मो स्वा॒हा
नमो गृ॒त्सेभ्यो गृत्सप॒ति भ्य॑श्च॒वो न॑मो स्वा॒हा
नमो व्रा॒तेभ्यो व्रातप॒ति भ्य॑श्च॒वो न॑मो स्वा॒हा
नमो ग॒णेभ्यो॑ गणप॒ति भ्य॑श्च॒वो न॑मो स्वा॒हा
नमो वि॒रूपेभ्यो विश्वरू॒पे भ्य॑श्च॒वो न॑मो स्वा॒हा
नमो म॒हद्भ्यः क्षुल्ल॒के भ्य॑श्च॒वो न॑मो स्वा॒हा
नमो र॒थिभ्यो ऽर॒थे भ्य॑श्च॒वो न॑मो स्वा॒हा
नमो र॒थेभ्यो र॒थप॒ति भ्य॑श्च॒वो न॑मो स्वा॒हा
नमः से॒नाभ्यः से॒नानि॑ भ्यश्च॒वो न॑मो स्वा॒हा
नमः क्षतृभ्य॑ः सङ्ग्र॒हीतृ॑ भ्यश्च॒वो न॑मो स्वा॒हा
नम स्त॒क्षभ्यो॑ रथका॒रे भ्यश्च॒वो न॑मो स्वा॒हा
नमः कु॒लालेभ्य॑ः क॒र्मा॒रे भ्य॑श्च॒वो न॑मो स्वा॒हा
नमः पु॒ञ्जिष्टेभ्यो नि॒षादे भ्यश्च॒वो न॑मो स्वा॒हा
नमै षुकृ॒द्भ्यो धन्व॒कृद॒ भ्य॑श्च॒वो न॑मो स्वा॒हा
नमो मृग॒युभ्य॑ः श्व॒नि भ्य॑श्च॒वो न॑मो स्वा॒हा
नमः श्वभ्य॑ः श्वप॒ति भ्य॑श्च॒वो नम॑ः स्वा॒हा ॥४ ॥

नमो भ॒वाय॑च रु॒द्राय॑च स्वा॒हा
नमः श॒र्व्याय॑च पशु॒प॒तये॑च स्वा॒हा
नमो नी॒लग्री॒वाय॑च शितिक॒ण्ठाय॑च स्वा॒हा
नमः क॒पर्दिने॑च व्युप्तके॒शाय॑च स्वा॒हा
नमः स॒हस्राक्षाय॒च॒ श॒तधन्व॑नेच स्वा॒हा
नमो गि॒रिशाय॑च शि॒पि॒विष्टाय॑च स्वा॒हा
नमो मी॒दुष्ट॑माय॒चे षुमतेच स्वा॒हा
नमो ह्र॒स्वाय॑च वाम॒नाय॑च स्वा॒हा
नमो बृ॒हते॑च व॒र्षीय॑सेच स्वा॒हा
नमो वृ॒द्धाय॑च सं॒वृध्व॑नेच स्वा॒हा
नमो ऽग्रि॒याय॑च प्र॒थ॒माय॑च स्वा॒हा
नमा ऽशवे॑चा जि॒राय॑च स्वा॒हा
नमः शीघ्रि॑याय॒च शीभ्या॑यच स्वा॒हा
नम ऊर्म्याय॑चा व॒स्वन्या॑यच स्वा॒हा
नमः स्रो॒तस्या॑यच द्वी॒प्याय॑च स्वा॒हा ॥५ ॥

नमो ज्ये॒ष्ठाय॑च क॒निष्ठा॑यच स्वा॒हा
नमः पूर्व॒जाय॒चा प॒र॒जाय॑च स्वा॒हा
नमो मध्य॑माय॒चा प॒गल्भा॑यच स्वा॒हा
नमो ज॒घन्या॑यच बु॒ध्नि॒याय॑च स्वा॒हा
नमः सो॒भ्याय॑च प्र॒ति॒सर्या॑यच स्वा॒हा
नमो या॒म्याय॑च क्षे॒म्याय॑च स्वा॒हा
नमो॒ र्वर्या॑यच ख॒ल्याय॑च स्वा॒हा
नमः श्लो॒क्याय॑चा व॒सान्या॑यच स्वा॒हा
नमो व॒न्याय॑च क॒क्ष्याय॑च स्वा॒हा
नमः श्र॒वाय॑च प्र॒ति॒श्र॒वाय॑च स्वा॒हा
नमा॒ ऽशुषे॑णाय॑चा ऽशु॒रथा॑यच स्वा॒हा
नमः शू॒राय॑चा व॒भिन्द॑तेच स्वा॒हा
नमो वर्मि॑णेच व॒रूथि॑नेच स्वा॒हा
नमो बि॒ल्मि॑नेच क॒वचि॒नेच॑ स्वा॒हा
नमः श्रु॒ताय॑च श्रु॒तसे॒नाय॑च स्वा॒हा ॥६॥

नमो दु॒न्दु॑भ्याय॒चा ह॒नन्या॑यच स्वा॒हा
नमो धृ॒ष्ण॑वेच प्र॒मृ॒शाय॑च स्वा॒हा
नमो दू॒ताय॑च प्रहि॒ताय॑च स्वा॒हा
नमो नि॒षङ्गि॒णे॒चे षु॒धिम॑तेच स्वा॒हा
नमस् ती॒क्ष्णेश॑वे॒चा ऽयु॒धिने॑च स्वा॒हा
नमः स्वायु॒धाय॑च सु॒धन्व॑नेच स्वा॒हा
नमः स्रु॒त्याय॑च प॒थ्याय॑च स्वा॒हा
नमः का॒टचाय॑च नी॒प्याय॑च स्वा॒हा
नमः सू॒दयाय॑च स॒रस्या॑यच स्वा॒हा
नमो ना॒दयाय॑च वै॒श॒न्ताय॑च स्वा॒हा
नमः कू॒प्याय॑चा व॒ट्याय॑च स्वा॒हा
नमो व॒र्ष्या॑य॑चा व॒र्ष्या॑य॑च स्वा॒हा
नमो मे॒घ्याय॑च विद्यु॒त्याय॑च स्वा॒हा
नम ईध्रि॒यायचा ऽत॒प्यायच स्वा॒हा
नमो वा॒त्याय॑च रे॒ष्मि॒याय॑च स्वा॒हा
नमो वा॒स्तव्या॑यच वास्तु॒पाय॑च स्वा॒हा ॥७॥

नमः सो॒माय॑चा रु॒द्राय॑च स्वा॒हा
नमस् ता॒म्राय॑चा ऽरु॒णाय॑च स्वा॒हा
नमः श॒ङ्गाय॑च प॒शु॒प॒तये॑च स्वा॒हा
नमौ॒ ग्राय॑च भी॒माय॑च स्वा॒हा
नमो॑ ऽग्रेव॑धायच दू॒रेव॑धायच स्वा॒हा
नमो॑ ह॒न्त्रेच॑ ह॒नीय॑सेच स्वा॒हा
नमो॑ वृ॒क्षे॑भ्यो ह॒रि॒के॑शे॑भ्यो स्वा॒हा
नमस् ता॒राय॑ स्वा॒हा
नमः श॒म्भ॑वेच म॒योभ॑वेच स्वा॒हा
नमः श॒ङ्क॑राय॒च म॒यस्क॑रा॒यच स्वा॒हा
नमः शि॒वाय॑च शि॒वत॒राय॑च स्वा॒हा
नमस् ती॒र्थ्या॑य॑च कू॒ल्याय॑च स्वा॒हा
नमः पा॒र्या॑य॑चा॒ ऽवा॒र्या॑यच स्वा॒हा
नमः प्र॒तर॑णा॑यचो त्त॑रणायच स्वा॒हा
नमा॒ ऽतार्या॑यचा॒ ऽलद्या॑यच स्वा॒हा
नमः श॒ष्प्याय॑च फे॒न्याय॑च स्वा॒हा
नमः सि॒कत्या॑यच प्रवा॒ह्याय॑च स्वा॒हा ॥८॥

नमै॒ रिण्या॑यच प्र॒पथ्या॑यच स्वा॒हा
नमः कि॒ँ॒शि॒लायच क्षय॑ना॑यच स्वा॒हा
नमः क॒पर्दि॑नेच पु॒लस्त॑येच स्वा॒हा
नमो गो॒ष्ठ्याय॑च गृ॒ह्याय॑च स्वा॒हा
नम् त॒ल्प्याय॑च गे॒ह्याय॑च स्वा॒हा
नमः का॒ट्याय॑च ग॒ह्व॒रेष्ठा॑यच स्वा॒हा
नमो ह्र॒दय्या॑यच नि॒वेष्प्या॑यच स्वा॒हा
नमः पा॒ँ॒स॑व्याय॒च॒ र॒जस्या॑यच स्वा॒हा
नमः शु॒ष्क्याय॑च ह॒रित्या॑यच स्वा॒हा
नमो लो॒प्याय॑चो॒ ऽलप्या॑यच स्वा॒हा
नमौ॒ र्व्या॑य॑च सू॒र्म्या॑य॑च स्वा॒हा
नमः प॒र्ण्या॑य॑च पर्ण॒षद्या॑यच स्वा॒हा
नमो ऽपगु॒र॒मा॒णाय॑चा॒ भिघ्न॑तेच स्वा॒हा
नम आ॒क्खिं॑दतेच प्र॒क्खिं॑दतेच स्वा॒हा
नमो वः कि॒रि॒के॑भ्यो दे॒वाना॒ँ॒ हृ॒द॒येभ्यो स्वा॒हा
नमो वि॒क्षीण॑केभ्यो स्वा॒हा
नमो वि॒चिन्व॑त्के॒भ्यो स्वा॒हा
नम आ॒निर्ह॑तेभ्यो स्वा॒हा
नम आ॒मीव॑त्केभ्यः स्वा॒हा ॥९॥

द्रापे॑ अन्ध॒सस्प॑ते द॒रिद्र॒न्नील॒लोहि॑त ।
ए॒षां पु॑रुषा॒णामे॒षां प॑शू॒नां मा॒ भेर्मा॒रो मो॒ ए॒षां किं च॒नाऽम॑मत ॥ स्वा॒हा

या॒ ते रु॑द्र शि॒वा त॑नूः शि॒वा वि॒श्वाह॑भेषजी ।
शि॒वा रु॒द्रस्य॑ भेषजी त॒या नो॑ मृड॒जीव॑से ॥ स्वा॒हा

इ॒मा॒ँ॒ रु॒द्राय॑ त॒वसे॑ क॒पर्दि॑ने क्षयद्वी॑राय॑ प्र॒भ॒राम॒हे म॑तिम् ।
य॒था नः॑ श॒म॒सद् द्वि॑पदे च॒तुष्प॑दे वि॒श्वं पु॒ष्टं ग्रा॒मे अ॒स्मिन्न॑नातुरम ॥ स्वा॒हा

मृ॒डा नो॑ रु॒द्रोत॒ नो॑ म॒यस्कृ॑धि क्षयद्वी॑राय न॒म॒सा वि॒धेम॑ ते ।
य॒च्छं च॑ योश्च म॒नुरा॑यजे पि॒ता त॒दश्या॑म॒ तव॒ रु॒द्र प्र॑णीतौ ॥ स्वा॒हा

मा॒ नो म॑हान्तमु॒त मा नो॑ अ॒र्भकं मा नौ॒क्षन्त॑मु॒त मा नौ॑क्षितं ।
मा॒ नो व॒धीः॑ पि॒तरं॑ मोत॒ मात॑रं प्रि॒या मा॑ नस्त॒नुवो॑ रु॒द्र॒ रीरिषः॑ ॥ स्वा॒हा

मा॒ नस्तो॑के त॒न॒ये मा ना॒यु॑षि मा॒ नो॒ गोषु॒ मा॒ नो ऽश्वे॑षुरीरिषः ।
वी॒रान्मा॑ नो रु॒द्र भामि॑तो व॒धीर्ह॒विष्म॑न्तो न॒म॒सा वि॑धेम ते ॥ स्वा॒हा

आ॒रा॒त्ते गोघ्नौ॒त पू॒रुषघ्ने क्षयद्वी॑राय॑ सु॒म्नम॒स्मे ते॑ अस्तु ।
र॒क्षा च॑ नो ऽधि॒ च॒ देव॑ ब्रूह्य॑धा च नः शर्म॑ य॒च्छ द्वि॒बर्हाः॑ ॥ स्वा॒हा

स्तु॒हि श्रु॒तं ग॒र्त॒सदं॑ यु॒वानं॑ मृ॒गं न॑ भी॒मम॑ुपह॒त्नुमु॒ग्रं ।
मृ॒डा ज॑रि॒त्रे रु॒द्र स्तवा॑नो॒ ऽन्यं ते॑ अ॒स्मन्नि॑ व॒पन्तु॒ सेनाः ॥ स्वा॒हा

प॒रि॒ नो रु॒द्रस्य॑ हे॒तिर्वृ॑णक्तु॒ परि त्वे॒षस्य॑ दु॒र्म॒तिर॑घायोः ।
अव॒ स्थि॒रा म॒घव॑द्भ्यस्तनुष्व॒ मीढ्व॒स्तो॒काय॑ त॒न॒याय॑ मृडय ॥ स्वा॒हा

मीढु॑ष्टम॒ शिव॑तम शि॒वो नः॑ सु॒म॒ना भव ।
प॒र॒मे वृ॒क्षा॒यु॑धं नि॒धाय॑ कृत्तिं॑ वसा॑ना॒ च॒र॒ पि॒नाकं॑ बिभ्र॒दा ग॑हि ॥ स्वा॒हा

वि॒कि॒रि॒द॒ वि॒लोहि॑त नमस्ते अस्तु भ॒गवः॑ ।
यास्ते स॒हस्र॑ँ॒ हे॒तयो ऽन्यम॒स्मन्नि॑ व॒पन्तु॑ ताः ॥ स्वा॒हा

स॒ह॒स्राणि॑ स॒ह॒स्र॒धा बा॒हु॒वोस्तव॒ हेतयः॑ ।
ता॒सा॒मी॒शानो॑ भ॒ग॒वः प॒रा॒चीना मु॒खा कृधि ॥ स्वा॒हा ॥१०॥

स॒ह॒स्रा॑णि स॒ह॒स्र॑शो ये॒ रु॒द्रा ऽधि॒ भू᳚म्याम् ।
ते॒षाँ॒᳚ स॒ह॒स्र॒ योज॒ने ऽव ध॒न्वा॑नि तन्मसि ॥ स्वा॒हा

अ॒स्मिन्म॒हत्य ऽर्ण॑वे ऽन्त॒रि॒क्षे भ॒वा ऽ॑धि ।
ते॒षाँ॒᳚ स॒ह॒स्र॒ योज॒ने ऽव ध॒न्वा॑नि तन्मसि ॥ स्वा॒हा

नी॒लग्री॑वाः शि॒तिक॑ण्ठाः श॒र्वा ऽ॒धः क्ष॒माच॑राः ।
ते॒षाँ॒᳚ स॒ह॒स्र॒ योज॒ने ऽव ध॒न्वा॑नि तन्मसि ॥ स्वा॒हा

नी॒लग्री॑वाः शि॒तिक॑ण्ठा दि॒वँ॒᳚ रु॒द्रा उ॒पश्रि॑ताः ।
ते॒षाँ॒᳚ स॒ह॒स्र॒ योज॒ने ऽव ध॒न्वा॑नि तन्मसि ॥ स्वा॒हा

ये वृ॒क्षेषु॑ स॒स्पिञ्ज॑रा नी॒लग्री॑वा वि॒लोहि॑ताः ।
ते॒षाँ॒᳚ स॒ह॒स्र॒ योज॒ने ऽव ध॒न्वा॑नि तन्मसि ॥ स्वा॒हा

ये॒ भू॒ताना॒म॒धिप॑त॒यो वि॒शिखा॑सः कप॒र्दिनः ।
ते॒षाँ॒᳚ स॒ह॒स्र॒ योज॒ने ऽव ध॒न्वा॑नि तन्मसि ॥ स्वा॒हा

ये अ॒न्नेषु॑ वि॒विध्य॑न्ति पा॒त्रेषु॑ पि॒ब॒तो जन॑ान् ।
ते॒षाँ॒᳚ स॒ह॒स्र॒ योज॒ने ऽव ध॒न्वा॑नि तन्मसि ॥ स्वा॒हा

ये प॒था॑ं पथि॒रक्ष॒य ऐ॒लबृ॒दा य॒व्युध॑ः ।
ते॒षाँ॒᳚ स॒ह॒स्र॒ योज॒ने ऽव ध॒न्वा॑नि तन्मसि ॥ स्वा॒हा

ये ती॒र्थानि॑ प्र॒चर॑न्ति सृ॒काव॑न्तो नि॒षङ्गिण॑ः ।
ते॒षाँ॒᳚ स॒ह॒स्र॒ योज॒ने ऽव ध॒न्वा॑नि तन्मसि ॥ स्वा॒हा

य ए॒ताव॑न्तश्च भू॒याँ॒᳚सश्च दि॒शो रु॒द्रा वि॒त॒स्थि॒रे ।
ते॒षाँ॒᳚ स॒ह॒स्र॒ योज॒ने ऽव ध॒न्वा॑नि तन्मसि ॥ स्वा॒हा

न॒मो॒ रु॒द्रेभ्यो॒ ये॒ पृ॒थि॒व्यां॑ ये ऽन्त॒रिक्षे॑ ये दि॒वि
ये॒षा॒मन्नं॒ वा॒तो व॒र्ष॒मिष॒व॒स्ते॒भ्यो
दश॒ प्रा॒ची॒र्द॒श॒ द॒क्षि॑णा दश॒ प्र॒ती॒ची॒र्द॒शो
दी॑ची॒र्द॒शो॒र्ध्वास्ते॒भ्यो नम॑स्ते नो मृ॒डयन्तु॒
ते॒ यं द्वि॒ष्मो यश्च॒ नो द्वेष्टि॒ तं॒ वो ज॒म्भे दधा॑मि स्वा॒हा ॥११॥

# चमकम्

ॐ अ॒ग्नावि॑ष्णू स॒जोष॑से मा व॒र्धन्तु॒ वां गिर॑ः ।
द्यु॒म्नैर्वाजे॑भि॒राग॑तम् ॥

वाज॑श्च मे प्रस॒वश्च॑ मे प्रय॑तिश्च मे प्रसि॑तिश्च मे धी॒तिश्च॑ मे क्रतु॑श्च मे स्वर॑श्च मे श्लोक॑श्च मे
श्रा॒वश्च॑ मे श्रुति॑श्च मे ज्योति॑श्च मे सुव॑श्च मे प्रा॒णश्च॑ मेऽपा॒नश्च॑ मे व्या॒नश्च॒ मेऽसु॑श्च मे चि॒त्तं च॑
म आधी॑तं च मे वाक्च॑ मे मन॑श्च मे चक्षु॑श्च मे श्रोत्रं॑ च मे दक्ष॑श्च मे बलं॑ च म ओज॑श्चमे
सह॑श्च म आयु॑श्च मे ज॒रा च॑ म आ॒त्मा च॑ मे त॒नूश्च॑ मे शर्म॑ च॒ मे वर्म॑ च॒ मेऽङ्गा॑नि च मेऽस्
थानि च मे प॒रूꣳ॑षि च॒ मे श॒रीरा॑णि॒ च मे स्वा॒हा ॥१॥

ज्यैष्ठ्यं॑ च म आधि॑पत्यं च मे म॒न्युश्च॑ मे भाम॑श्च मेऽम॑श्च मेऽम्भ॑श्च मे जे॒मा च॑ मे महि॒मा च॑ मे व॒रि
मा च॑ मे प्रथि॒मा च॑ मे व॒र्ष्मा च॑ मे द्राघु॒या च॑ मे वृ॒द्धं च॑ मे वृद्धि॑श्च मे स॒त्यं च॑ मे श्र॒द्धा च॑ मे
जग॑च्च मे धनं॑ च मे वश॑श्च मे त्विषि॑श्च मे क्री॒डा च॑ मे मोद॑श्च मे जा॒तं च॑मे ज॒निष्य॒माणं॑ च मे
सू॒क्तं च॑ मे सुकृ॒तं च॑ मे वि॒त्तं च॑ मे वेद्यं॑ च मे भू॒तं च॑ मे भ॒विष्यं॑च्च मे सु॒गं च॑ मे सु॒पथं॑ च म
ऋ॒द्धं च॑ म ऋद्धि॑श्च मे क्लृ॒प्तं च॑ मे क्लृप्ति॑श्च मे म॒तिश्च॑ मे सुम॒तिश्च॑ मे स्वा॒हा ॥२॥

शं॑ च मे मय॑श्च मे प्रि॒यं च॑ मेऽनुका॒मश्च॑ मे काम॑श्च मे सौमन॒सश्च॑ मे भ॒द्रं च॑ मे श्रेय॑श्च मे वस्
यश्च मे यश॑श्च मे भग॑श्च मे द्रवि॑णं च मे य॒न्ता च॑ मे ध॒र्ता च॑ मे क्षेम॑श्च मे धृति॑श्च मे विश्वं॑
च मे मह॑श्च मे सं॒विच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृ
तं च मे यक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सु
गं च मे शयनं च मे सूषा च मे सुदिनं च मे स्वा॒हा ॥३॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृ
षिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च
मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मे
ऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधू माश्च मे
मसुराश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे स्वा॒हा ॥४॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च
मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म
ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां
वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽ
र्थश्च म एमश्च म इतिश्च मे गतिश्च मे स्वा॒हा ॥५॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पू
षा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा
च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च
म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च
म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे

स्वा॒हा ॥६॥

अ ँ्शुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपा ँ्शुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे स्वा॒हा ॥७॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे स्वा॒हा ॥८॥

अग्निश्च मे धर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम स्वा॒हा ॥९॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाच्च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पता ँ्श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् स्वा॒हा ॥१०॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च मे एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च मे एकवि ँ्शतिश्च मे त्रयोवि ँ्शतिश्च मे पञ्चवि ँ्शतिश्च मे सप्तवि ँ्शतिश्च मे नववि ँ्शतिश्च मे एकत्रि ँ्शच्च मे त्रयस्त्रि ँ्शच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोदश च मे वि ँ्शतिश्च मे चतुर्वि ँ्शतिश्च मेऽष्टावि ँ्शतिश्च मे द्वात्रि ँ्शच्च मे षट्त्रि ँ्शच्च मे चत्वारि ँ्शच्च म चतुश्चत्वारि ँ्शच्च मेऽष्टाचत्वारि ँ्शच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च स्वा॒हा ॥११॥

इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि श ँ्सिषद्विश्वेदेवाः
सूक्त वाचः पृथिवि मातर्मामा हि ँ्सीर्मधुमनिष्ये मधुजनिष्ये
मधुवक्ष्यामि मधुवदिष्यामि मधु मतीं देवेभ्यो वाचमुद्यास ँ्
शुश्रूषेण्यां मनुष्येभ्यस तं मा देवा अवन्तुशोभायै पितरोऽनु मदन्तु
ॐ शांतिः शांतिः शांतिः

ॐ सर्वं वै पूर्णगम् स्वाहा
ॐ सर्वं वै पूर्णगम् स्वाहा
ॐ सर्वं वै पूर्णगम् स्वाहा
ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते पूर्णस्य पूर्णमादाय पूर्णमे वावशिष्यते
ॐ शांतिः शांतिः शांतिः